॥ अथ गणपाठः ॥

१ सर्वादिः

सूत्रम् सर्वादीनि सर्वनामानि १.१.२७

सर्व । विश्व । उभ । उभय । डतर । डतम । अन्य । अन्यतर । इतर । त्वत् । त्व । नेम । सम । सिम । पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् । तद् । यद् । एतद् । इदम् । अदस् । एक । द्वि । युष्मद् । अस्मद् । भवतु । किम् ॥

२ स्वरादिः आकृतिगणः

सूत्रम् स्वरादिनिपातमव्ययम् १.१.३७

स्वर् । अन्तर् । प्रातर् । अन्तोदात्ताः । पुनर् । सनुतर् । उच्चैस् । नीचैस् । शनैस् । ऋधक् । ऋते । युगपत् । आरात् । अन्तिकात् । पृथक् । आद्युदात्ताः । ह्यस् । श्वस् । दिवा । रात्रौ । सायम् । चिरम् । मनाक् । ईषत् । शश्वत् । जोषम् । तूष्णीम् । बहिस् । अधस् । अवस् । समया । निकषा । स्वयम् । मृषा । नक्तम् । नञ् । हेतौ । हे । है । इद्धा । अद्धा । सामि । अन्तोदात्ताः । वत् (गणसूत्रम्) , यथा ब्राह्मणवत्, क्षत्रियवत् । सना । सनत् । सनात् । उपधा । तिरस् । आद्युदात्ताः । अन्तरा । अन्तोदात्ताः । अन्तरेण । मक् । ज्योक् । योक् । नक् । कम् । शम् । सना । सहसा । श्रद्धा । अलम् । स्वधा । वषट् । विना । नाना । स्वस्ति । अन्यत् । अस्ति । उपांशु । क्षमा । विहायसा । दोषा । मृषा । मुधा । दिष्ट्या । वृथा । मिथ्या । क्तवातोसुन्कसुनः (गणसूत्रम्) । कृन्मकारसन्ध्यक्षरान्तोऽव्ययीभावश्च (गणसूत्रम्) । पुरा । मिथो । मिथस् । प्रायस् । मुहुस् । प्रवाहुकम् । प्रवाहिका । आर्यहलम् । अभीक्ष्णम् । सायम् । साकम् । सार्धम् । सार्थम् । सत्रम् । समम् । नमस् । हिरुक् । तसिलादयस्तद्धित एधाच्चपर्यन्ताः (गणसूत्रम्) । शस्तसी, कृत्वसुच्, सुच्, आस्थालौ । च्व्यर्थाश्च (गणसूत्रम्) । अथ । अम् । आम् । प्रताम् । प्रतान् । प्रशान् । तथाहि । मा । माङ् । श्रम् । कामम् । प्रकामम् । भूयस् । परम् । साक्षात् । साचि ।

सावि । सत्यम् । मंक्षु । संवत् । अवश्यम् । सपदि । प्रादुस् । आविस् । अनिशम् । नित्यम् । नित्यदा । सदा । अजस्रम् । सन्ततम् । उषा । ओम् । भूर् । भुवर् । झटिति । तरसा । सुष्ठु । कु । अञ्जसा । अ । मिथु । अमिथु । विथक् । भाजक् । अन्वक् । चिराय । चिरम् । चिररात्राय । चिरस्य । चिरेण । चिरात् । अस्तम् । आनुषक् । अनुषक् । अनुषट् । अम्नस् । अम्भस् । अम्नर् । अम्भर् । स्थाने । वरम् । दुष्ठु । बलात् । शु । अर्वाक् । शुदि । वदि । इत्यादि । तसिलादयः प्राक्पाशपाः (गणसूत्रम्) । शस्प्रभृतयः प्राक्समासान्तेभ्यः (गणसूत्रम्) । मान्तः कृत्वोर्थः । नानाञौ ॥

३ चादिः आकृतिगणः
सूत्रम् चादयोऽसत्त्वे १.४.५७

च । वा । ह । अह । एव । एवम् । नूनम् । शश्वत् । युगपत् । भूयस् । सूपत् । कूपत् । कुवित् । नेत् । चेत् । चण् । कच्चित् । यत्र । तत्र । नह । हन्त । माकिम् । माकीम् । माकिर् । नकिम् । नकीम् । नकिर् । आकीम् । माङ । नञ् । तावत् । यावत् । त्वा । त्वै । द्वै । न्वै । रै । रे । श्रौषट् । वौषट् । स्वाहा । वषट् । स्वधा । ओम् । तथा । तथाहि । खलु । किल । अथ । सुष्टु । स्म । अ । इ । उ । ॠ । ॡ । उ । ए । ऐ । ओ । औ । आदह । उञ् । उकञ् । वेलायाम् । मात्रायाम् । यथा । यत् । तत् । किम् । पुरा । वधा । वध्वा । धिक् । हाहा । हेहै । हहे । पाट् । प्याट् । आहो । उताहो । हो । अहो । नो । नौ । अथो । ननु । मन्ये । मिथ्या । असि । ब्रूहि । तु । नु । इति । इव । वत् । वात् । वन । बत । सम् । वशम् । शिकम् । दिकम् । सनुकं । छंवट् । छंबट् । शङ्के । शुकम् । खम् । सनात् । सनुतर् । नहिकम् । सत्यम् । ॠतम् । अद्धा । इद्धा । नोचेत् । नचेत् । नहि । जातु । कथम् । कुतः । कुत्र । अव । अनु । हा । हे । है । आहोस्वित् । शम् । कम् । खम् । दिष्ट्या । पशु । नट् । सह । आनुषट् । आनुषक् । अङ्ग । फट् । ताजक् । भाजक् । अये । अरे । वाट् । चाटु । कुम् । खुम् । घुम् । अम् । ईम् । सीम् । सिम् । सि । वै । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः ॥

४ प्रादिः

सूत्रम् प्रादयः १.४.५८

प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ् । नि । अधि । अपि । अति । सु । उद् । अभि । प्रति । परि । उप ॥

५ ऊर्यादिः
सूत्रम् ऊर्यादिच्विडाचश्च १.४.६१

ऊरी । उररी । तन्थी । ताली । आत्ताली । वेताली । धूली । धूस । शकला । संशकला । ध्वंसकला । भ्रंसकला । गुलुगुधा । सजूस् । फल । फली । विक्ली । आक्ली । आलोष्ठी । केवाली । केवासी । सेवासी । पर्याली । शेवाली । वर्षाली । अत्यूमशा । मश्मशा । मस्मसा । मसमसा । औषट् । श्रौषट् । वौषट् । वषट् । स्वाहा । स्वधा । वन्धा । प्रादुस् । श्रत् । आविस् ॥

६ साक्षात्प्रभृतिः आकृतिगणः
सूत्रम् साक्षात्प्रभृतीनि च १.४.७४

साक्षात् । मिथ्या । चिन्ता । भद्रा । रोचना । आस्था । अमा । श्रद्धा । प्राजर्या । प्राजरुहा । बीजर्या । बीजरुहा । संसर्या । अर्थे । लवणम् । उष्णम् । शीतम् । उदकम् । आर्द्रम् । अग्नौ । वशे । विहसने । प्रसहने । प्रतपने । प्रादुस् । नमस् । आविस् ॥

७ तिष्ठद्गुप्रभृतिः
सूत्रम् तिष्ठद्गुप्रभृतीनि च २.१.१७

तिष्ठद्गु । वहद्गु । आयतीगवम् । खलेयवम् । खलेबुसम् । लूनयवम् । लूयमानयवम् । पूतयवम् । पूयमानयवम् । संहृतयवम् । संह्रियमाणायवम् । संहृतबुसम् । संह्रियमाणाबुसम् । समभूमि । समपदाति । सुषमम् । विषमम् । दुःषमम् । निःषमम् । अपरसमम् । आयतीसमम् । प्रौढम् । पापसमम् । पुण्यसमम् । प्राह्णम् । प्ररथम् । प्रभृगम् । प्रदक्षिणम् । अपरदक्षिणम् । संप्रति । असंप्रति । इत्प्रत्ययः समासान्तः ५.४.१२७ - ५.४.१२८ ॥

८ शौण्डादिः
सूत्रम् सप्तमी शौण्डैः २.१.४०

शौण्ड । धूर्त । कितव । व्याड । प्रवीण । संवीत । अन्तर् । अधि । पटु । पण्डित । कुशल । चपल । निपुण ॥

९ पात्रेसमितादिः आकृतिगणः
सूत्रम् पात्रेसमितादयश्च २.१.४८

पात्रेसमिताः । पात्रेबहुलाः । उदुम्बरमशकाः । उदरकृमिः । कूपकच्छपः । अवटकच्छपः । कूपमण्डूकः । कुम्भमण्डूकः । उदपानमण्डूकः । नगरकाकः । नगरवायसः । मातरिषुरुषः । पिण्डीशूरः । पितरिशूरः । गेहेशूरः । गेहेनर्दी । गेहेक्ष्वेडी । गेहेविजिती । गेहेव्याडः । गेहेमेही । गेहेदाही । गेहेदृप्तः । गेहेधृष्टः । गर्भेतृप्तः । आखनिकवकः । गोष्ठेशूरः । गोष्ठेविजिती । गोष्ठेक्ष्वेडी । गोष्ठेपटु । गोष्ठेपण्डितः । गोष्ठेप्रगल्भः । कर्णेटिरिटिरा । कर्णेचुरचुरा ॥

१० व्याघ्रादिः आकृतिगणः
सूत्रम् उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २.१.५६

व्याघ्र । सिंह । ऋक्ष । ऋषभ । चन्दन । वृक । वृष । वराह । हस्तिन् । तरु । कुञ्जर । रुरु । पृषत् । पुण्डरीक । पलाश । कितव । मुखपद्मम् । मुखकमलम् । करकिसलयम् । पार्थिवचन्द्रः ॥

११ श्रेण्यादिः
सूत्रम् श्रेण्यादयः कृतादिभिः २.१.५९

श्रेणि । एक । पूग । मुकुन्द । राशि । निचय । विषय । निधन । पर । इन्द्र । देव । मुण्डभूत । श्रवण । वदान्य । अध्यापक । अभिरूपक । ब्राह्मण । क्षत्रिय । विशिष्ट । पटु । पण्डित । कुशल । चपल । निपुण । कृपण ॥

१२ कृतादिः
सूत्रम् श्रेण्यादयः कृतादिभिः २.१.५९

कृत । मित । मत । भूत । उक्त । युक्त । समाज्ञात । समाम्नात । समाख्यात । सम्भावित । संसेवित । अवधारित । अवकल्पित । निराकृत । उपकृत । उपाकृत । दृष्ट । कलित । दलित । उदाहृत । विश्रुत । उदित ॥

१३ शाकपार्थिवादिः आकृतिगणः
सूत्रम् क्तेन नञ्विशिष्टेनानञ् (शाकपार्थिवादीनामुपसङ्ख्यानम्) २.१.६०

शाकपार्थिवः । कुतपसौश्रुत । अजातौल्वलि । कृताकृत । भुक्तविभुक्त । पीतविपीत । गतप्रत्यागत । यातानुयात । क्रयाक्रयिका । पुटापुटिका । फलाफलिका । मानोन्मानिका ॥

१४ श्रमणादिः
सूत्रम् वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ३.१.७०

श्रमणा । प्रव्रजिता । कुलटा । गर्भिणी । तापसी । दासी । बन्धकी । अध्यापक । अभिरूपक । पण्डित । पटु । मृदु । कुशल । चपल । निपुणा ॥

१५ मयूरव्यंसकादिः आकृतिगणः
सूत्रम् मयूरव्यंसकादयश्च २.१.७२

मयूरव्यंसक । छात्रव्यंसक । कम्बोजमुण्ड । यवनमुण्ड । छन्दसि हस्तेगृह्य । हस्तगृह्य । पादेगृह्य । पादगृह्य । लाङ्गूलेगृह्य । लाङ्गूलगृह्य । पुनर्दाय । एहीडादयोऽन्यपदार्थे । एहीडम् । एहियवम् । एहिवाणिजा क्रिया । अपेहिवाणिजा । प्रेहिवाणिजा । एहिस्वागता । अपोहिस्वागता । प्रेहिस्वागता । एहिद्वितीया । अपेहिद्वितीया । प्रेहिद्वितीया । एहिकटा । अपोहकटा । प्रोहकटा । आहरकटा । प्रोहिकर्दमा । प्रोहकर्दमा । विधमचूडा । उद्धमचूडा । उद्धरचूडा । आहरचेला । हरवसन । आहरवनिता । हतविनत । कृन्तविचक्षणा । उद्धरोत्सृजा । उद्धरावसृजा । उद्धमविधमा । उत्पचनिपचा । उत्पतनिपता । उच्चावचम् । उच्चनीचम् । अचोपचम् । आपराचम् । खप्रचम । निश्चप्रचम् । अकिंचन । स्नात्वाकालक । पीत्वास्थिरक । भुक्त्वासुहित । प्रोष्यपापीयान् । उत्पत्यपाकला । निपत्यरोहिणी । निषण्णाश्यामा । अप्रेहिप्रघसा । प्रेहिप्रघसा । इहपञ्चमी । इहद्वितीया । जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति । जहिजोड । जहिजोडम् । जहिस्तम्बः । ज्जहिस्तम्बम । आख्यातमाख्यातेन क्रियासातत्ये । अश्नीतपिबता । पचतभृज्जता । खादतमोदता । खादतवमता । खादताचमता । आहरनिवपा । आवपनिष्किरा ।

उत्पचच्विपचा । भिन्धिलवणा । कृन्धिविचक्षना । पचलवणा । पचप्रकूटा । । अकुतोभयः । कान्दिशीकः । कान्दोशीकः । स्त्राहोपुरुषिका । अहमहमिका । यदृच्छा । एहिरेयाहिरा । उन्मृजावमृजा । द्रव्यान्तरम् । अवश्यकार्यम् ॥

१६ याजकादिः
सूत्रम् याजकादिभिश्च २.२.९

याजक । पूजक । परिचारक । परिवेषक । परिषेचक । स्नातक । अध्यापक । उत्साह । उद्वर्तक । होतृ । भतृ । रथगणक । पत्तिगणक ॥

१७ राजदन्तादिः
सूत्रम् राजदन्तादिषु परम् २.२.३१

राजदन्तः । अग्रेवणम् । लिप्तवासितम् । नग्नमुषितम् । सिक्तसंमृष्टम् । मृष्टलुञ्चितम् । अवक्लिन्नपक्वम् । अर्पितोप्तम् । उप्तगाढम् । उलूखलमुसलम् । तण्डुलकिण्वम् । दृषदुपलम् । आरड्वायनि । आरग्वायनबन्धकी । चित्ररथवाह्लीकम् । आवन्त्यश्मकम् । शूद्रार्यम् । स्नातकराजानौ । विष्वक्सेनार्जुनौ । अक्षिभ्रुवम् । दारगवम् । शब्दार्थौ । धर्मार्थौ । कामार्थौ । अर्थशब्दौ । अर्थधर्मौ । अर्थकामौ । वैकारिमतम् । गाजवाजम् । गोपालधानपूलासम् । गोपालधानीपूलासम् । पूलासकारण्डम् । पूलासककुरण्डम् । स्थूलासम । स्थूलपूलासम् । उशीरबीजम् । जिज्ञास्थि । सिञ्जास्थम् । सिञ्जाश्वत्थम् । चित्रास्वाती । चित्रस्वाती । भार्यापती । दंपती । जंपती । जायापती । पुत्रपती । पुत्रपशू । केशरश्मश्रू । शिरोबिजु । शिरोबीजम । शिरोजानु । सर्पिर्मधुन । मधुसर्पिषी । आद्यन्तौ । अन्तादी । गुणवृद्धी । वृद्धिगुणौ ॥

१८ आहिताग्न्यादिः आकृतिगणः
सूत्रम् वाहिताग्न्यादिषु २.२.३७

आहिताग्निः । जातपूत्रः । जातदन्त । जातशमश्रु । तैलपीत । घृतपीत । द्यपी । ऊढभार्य । गतार्थ । गडुकण्ठ । अस्युद्यत । अरमुद्यत । दण्डपाणि ॥

१९ कडारादिः

सूत्रम् कडाराः कर्मधारये २.२.३८

कडार । गुडुल । खञ्ज । खोड । काण । कुण्ठ । खलति । गौर । वृद्ध । भिक्षुक । पिङ्गुल । पिङ्गल । तड । तनु । ठ । बधिर । मठर । कञ्ज । बर्बर ॥

२० नावादिः
सूत्रम् मन्यकर्मण्यनादरे विभाषाऽप्राणिषु (नौकाकान्नशुकशृगालवर्जेषु) २.३.१७

नौ । काक । अन्न । शुक । शृगाल ॥

२१ प्रकृत्यादिः
सूत्रम् कर्तृकरणयोस्तृतीया २.३.१८

प्रकृति । प्राय । गोत्र । सम । विषम । द्विद्रोण । पञ्चक । साहस्र ॥

२२ प्रत्यादिः
सूत्रम् साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः (अप्रत्यादिभिरिति वक्तव्यम्) २.३.४३

प्रति । परि । अनु ॥

२३ गवाश्वादिः
सूत्रम् गवाश्वप्रभृतीनि च २.४.११

गवाश्वम् । गवाविकम् । गवैडकम् । अजाविकम् । अजैडकम् । कुब्जवामनम् । कुब्जकिरातम् । पुत्रपौत्रम् । श्वचण्डालम् । स्त्रीकुमारम् । दासीमाणवकम् । शाटीपटीरम् । शाटीपच्छकम् । शाटीपट्टीकम् । उष्ट्रखरम् । उष्ट्रशशम् । मूत्रशकृत् । मूत्रपुरीषम् । यकृन्मेदः । मांसशोणितम् । दर्भशरम् । दर्भपूतीकम् । अर्जुनशिरीषम् । अर्जुनपुरुषम् । तृणोपलम् । तृणोलपम । दासीदासम् । कुटीकुटम् । भागवतीभागवतम् ॥

२४ दधिपयस्यादिः
सूत्रम् न दधिपयआदीनि २.४.१४

दधिपयसी । सर्पिर्मधुनी । मधुसपिषी । ब्रह्मप्रजापती । शिववैश्रवणौ । स्कन्दविशाखौ । परिव्राजककौशिकौ । (परिव्राट्कौशिकौ) । प्रवर्ग्योपसदौ । शुक्लकृष्णौ । इध्माबर्हिषी । दीक्षातपसी । श्रद्धातपसी । मेधातपसी ।

अध्ययनतपसी । उलूखलमुसले । आद्यावसाने । श्रद्धामेधे । ऋक्सामे । वाङ्मनसे ।

२५ अर्धर्चादिः
सूत्रम् अर्धर्चाः पुंसि च २.४.३१

अर्धर्च । गोमय । कषाय । कार्षापण । कुतप । कुसप । कुणप । कपाट । शङ्ख । गूथ । यूथ । ध्वज । कबन्ध । पद्म । गृह । सरक । कंस । दिवस । यूष । अन्धकार । दण्ड । कमण्डलु । मन्ड । भूत । द्वीप । द्यूत । चक्र । धर्म । कर्मन् । मोदक । शतमान । यान । नख । नखर । चरण । पुच्छ । दाडिम । हिम । रजत । सक्तु । पिधान । सार । पात्र । घृत । सैन्धव । औषध । आढक । चषक । द्रोण । खलीन । पात्रीव । षष्टिक । वारबाण । वारवारण । प्रोथ। कपित्थ। शुष्क । शाल । शील । शुक्ल । शुल्क । शीधु । कवच । रेणु । ऋण । कपट । शीकर । मुसल । सुवर्ण । वर्ण । पूर्व । चमस । क्षीर । कर्ष । आकाश । अष्टापद । मङ्गल । निधन । निर्यास । जृम्भ । वृत्त । पुस्त । बुस्त । क्ष्वेडित । शृङ्ग । निगड । खल । मूलक । मधु । मूल । स्थूल । शराव । नाल । वप्र । विमान । मुख । प्रग्रीव । शूल । वज्र । कटक । कण्टक । कर्पट । शिखर । कल्क । वल्कल । नटमस्तक । नाटमस्तक । वलय । कुसुम । तृण। पङ्क । कुण्डल । किरीट । कुमुद । अर्बुद । अङ्कुश । तिमिर । आश्रय । भूषण । इक्कस । इष्वास । मुकुल । वसन्त । तटाक । तडाग । पिटक । विटङ्क । विडङ्ग । पिण्याक । माष । कोश । फलक । दिन । दैवत । पिनाक । समर । स्थाणु । अनीक । उपवास । शाक । कर्पास । विशाल । चषाल । चखाल । खण्ड । दर । विटप । रण । बल । मक । मृणाल । हस्त । आर्द्र । हल । सूत्र । ताण्डव । गाण्डीव । मण्डप । पटह। सौध । योध । पार्श्व । शरीर । फल । छल । पुर । पुरा । राष्ट्र । अम्बर । बिम्ब । कुट्टिम । मण्डल । कुक्कुट । कुडप । ककुद । खण्डल । तोमर। तोरण। मञ्चक। पुङ्ख। मध्य । बाल । छाल । वल्मीक। वर्ष। वस्त्र । वसु । देह। उद्यान। उद्योग। स्नेह । स्तेन । खन । स्वर । सङ्गम । निष्क । क्षेम । शूक । क्षत्रपवित्र । यौवन । कलह । मालक । पालक

। मूषिक । मण्डल । वल्कल । कुज । कुञ्ज । विहार । लोहित । विषाण । भवन । अरण्य । पुलिन । दृढ । आसन । ऐरावत । शूर्प । तीर्थ । लोमन । लोमश । तमाल । लोह । दण्डक । शपथ । प्रतिसर । दारु । धनुस् । मान । वर्चस्क । कूर्च । तण्डक । मठ । सहस्र । ओदन । प्रवाल । शकट । अपराह्ण । नीड । शकल । तण्डुल ॥

२६ पैलादिः आकृतिगणः
सूत्रम् पैलादिभ्यश्च २.४.५९

पैल । शालङ्कि । सात्यकि । सात्यकामि । राहवि । रावणि । औदञ्चो । औदव्रजि । औदमेघि । औदव्यज्रि । औदमज्जि । औदमृज्जि । दैवस्थानि । पैङ्गलौदायनि । राहक्षति । भौलिङ्गि । औदन्यि । औद्गाहमानि । औज्जिहानि । औदशुद्धि । तद्राजाच्चाणः । तद्राज ॥

२७ तौल्वल्यादिः
सूत्रम् न तौल्वलिभ्यः २.४.६१

तौल्वलि । धारणि । पारणि । रावणि । दैलीपि । दैवति । वार्कलि । नैवति । नैवकि । दैवमित्रि । दैवमति । दैवयज्ञि । चाफट्टकि । बैल्वकि । वैकि । वैङ्कि । आनुहारति । आनुराहति । पौष्करसादि । आनुरोहति । आनुति । प्रादोहनि । नैमिश्रि । प्राडाहति । बान्धकि । वैशीति । आसिनासि । आंहिसि । आसुरी । नैमिषि । आसिबन्धकि । पौष्पि । कारेणुपालि । वैकर्णि । वैरकि । वैहति ॥

२८ यस्कादिः
सूत्रम् यस्कादिभ्यो गोत्रे २.४.६३

यस्क । लह्य । दुह्य । अयस्थूण । अयःस्थूण । तृणकर् । सदामत्त । कम्बलहार । बहिर्योग । पर्णाढक । कर्णाढक । पिण्डीजङ्घ । बकसक्थ । वकसक्थ । वोश्रि । कुद्रि । अजवस्ति । मित्रयु । रक्षोमुख । जङ्घारथ । उत्कास । कटुकमथक । मन्थक । पुष्करट् । पुष्करसद् । विषपुट । उपरिमेखल । क्रोष्टुकमान । क्रोष्टुमान । क्रोष्टुपाद । क्रोष्टुमाय । शीर्षमाय । खरप । पदक । वर्षुक । भलन्दन । भडिल । भण्डिल । भडित ॥

२९ गोपवनादिः
सूत्रम् न गोपवनादिभ्यः २.४.६७

गौपवन । शेयु । शिप्रु । बिन्दु । भाजन । अश्वावतान । श्यामाक । श्योनाक । श्यामक । श्यापर्ण । (बिदाद्यन्तर्गणोऽयम् ४.१.१०४) ॥

३० तिककितवादिः
सूत्रम् तिककितवादिभ्यो द्वन्द्वे २.४.६८

तिककितवाः । वङ्खरभण्डीरथाः । उपकलमकाः । पफकनरकाः । बकनखगुदपरिणद्धाः । उब्जककुभाः । लङ्कशान्तमुखाः । उत्तरशलङ्कटाः । कृष्णाजिनकृष्णसुन्दराः । भ्रष्टककपिष्ठलाः । अग्निवेशदशेरुकाः ॥

३१ उपकादिः
सूत्रम् उपकादिभ्योऽन्यतरस्यामद्वन्द्वे २.४.६९

उपकलमक । भ्राष्ट्रक । कपिष्ठल । कृष्णाजिन । कृष्णसुन्दर । चूडारक । आडारक । गडुक । उदङ्क । सुधायुक । अवन्धक । पिङ्गलक । पिष्टक । सुपिष्ट । सुपिष्ठ । मयूरकर्ण । खारीजङ्घ । शलाथल । पतञ्जल । पदञ्जल । कठेरणि । कुषीतक । काशकृत्स्न । काशकृत्स्न । निदाघ । कलशीकण्ठ । दामकण् । कृष्णपिङ्गल । कर्ण । पर्णक । जटिरक । बधिरक । जन्तुक । अनुलोम । अनुपद । प्रतिलोम । अपजग्ध । प्रता । अनभिहित । कमक । कराटक । लेखाम्र । कमन्दक । पिञ्जलक । कर्णक । मयूरकर्ण । नदाघ । कवन्तक । कमन्तक । कदामत । दामकण्ठ ॥

३२ भृशादिः
सूत्रम् भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ३.१.१२

भृश । शीघ्र । चपल । मन्द । पण्डित । उत्सुक । सुमनस् । दुर्मनस् । अभिमनस् । उन्मनस् । रहस् । रोहत् । रेहत् । संश्चत् । तृपत् । शश्वत् । भ्रमत् । वेहत् । शुचिस् । शुचिवर्चस् । अण्डर । वर्चस् । ओजस् । सुरजस् । अरजस् ॥

३३ लोहितादिः आकृतिगणः
सूत्रम् लोहितादिडाज्भ्यः क्यष् ३.१.१३

लोहित । चरित । नील । फेन । मद्र । हरि । दास । मन् ॥

३४ सुखादिः
सूत्रम् सुखादिभ्यः कर्तृवेदनायाम् ३.१.१८

सुख । दुःख । तृप्त । कृच्छ्र । अस्र । आस्र । अलोक । प्रतीप । करुण । कृपण । सो॥

३५ कण्ड्वादिः आकृतिगणः
सूत्रम् कण्ड्वादिभ्यो यक् ३.१.२७

कण्डूञ् । मन्तु । हृणीङ् । वल्गु । असु । नस । महीङ् । लोट् । लेट् । इरस् । इरज् । इरञ् । उवस् । उषस् । वेट् । मेधा । कुषुभ । नमस् । मगध । तन्तस् । पम्पस् । पपस् । सुख । दुःख । भिक्ष । चरण । चरम । अवर । सपर । अरर । अरर् । भिषज् । भिष्णुज् । अपर । आर । इषुध । वरण । चुरण । चुरण । भुरण । गद्गद । एला । केला । खेला । वेला । शेला । लिट् । लाट् । लेखा । लेख । रेखा । द्रवस् । तिरस् । अगद । उरस् । तरण । तरिण । पयस् । संभूयस् । सम्बर ॥

३६ नन्द्यादिः
सूत्रम् नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३.१.१३४

नन्दिवाशिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् । नन्दनः । वाशनः । मदनः । दूषणः । साधनः । वर्धनः । शोभनः । रोचनः । सहितपिदमेः संज्ञायाम् । सहनः । तपनः । दमनः । जल्पनः । रमणः । दर्पणः । सङ्क्रन्दनः । सङ्कर्षणः । संहर्षणः । जनार्दनः । यवनः । मधुसूदनः । विभीषणः । लवणः । चित्तविनाशनः । कुलदमनः । शत्रुदमनः॥

३७ ग्रह्यादिः
सूत्रम् नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३.१.१३४

ग्राही । उत्साही । उद्दासो । उद्भासी । स्थायी । मन्त्री । संमर्दी । रक्षश्रुवसवपशां नौ । निरक्षी । निश्रावी । निवापौ । निशायी । याचृव्याहृसंव्याहृव्रजवदवसां प्रतिषिद्धानाम् । अयाची । अव्याहारी । असंव्याहारी । अव्राजी । अवादी । अवासी । अचामचित्तकर्तृकाणां प्रतिषिद्धानाम् । अकारी । अहारी । अविनायी । विशायी ।

विषायी । विशयी विषयी देशे विशयी देशः । विषयी देशः । अभिभावी भूते । अपराधी । उपरोधी । परिभवी । परिभावी ॥

३८ पचादिः आकृतिगणः
सूत्रम् नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३.१.१३४

पच । वच । वप । वद । चल । पत । नदट् । भषट् । प्लवट् । चरट् । गरट् । तरट् । चोरट् । गाहट् । सरट् । देवट् । दोषट् । जर । रज । मर । मद । क्षम । क्षप । सेव । मेष । कोप । कोष । मेधा । नर्त । व्रण । दर्श । सर्प । दम्भ । दर्प । जारभर । श्वपच ॥

३९ मूलविभुजादिः आकृतिगणः
सूत्रम् तुन्दशोकयोः परिमृजापनुदोः (कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्) ३.२.५

मूलविभुज । नखमुच । काकगुह । कुमुद । महीध्र । कुध्र । गिध्र ॥

४० पार्श्वादिः
सूत्रम् अधिकरणे शेतेः (पार्श्वादिषूपसङ्ख्यानम्) ३.२.१५

पार्श्व । उदर । पृष्ठ । उत्तान । अवमूर्धन ॥

४१ गम्यादिः
सूत्रम् भविष्यति गम्यादयः ३.३.३

गमी । आगमी । भावी । प्रस्थायी । प्रतिरोधी । प्रतियोधी । प्रतिबोधी । प्रतियायी । प्रतियोगी ॥

४२ भिदादिः
सूत्रम् षिद्भिदादिभ्योऽङ् ३.३.१०४

भिदा विदारणे । छिदा द्वेधीकरणे । विदा । क्षिपा । गुहा गिर्योषध्योः । श्रद्धा । मेधा । गोधा । आरा शस्त्र्याम् । हारा । कारा बन्धने । क्षिया । तारा ज्योतिषि । धारा प्रपातने । रेखा । चूडा । पीडा । वपा । वसा । सृजा । क्रपेः संप्रसारणं च । कृपा ॥

४३ संपदादिः
सूत्रम् रोगाख्यायां ण्वुल् बहुलम् (संपदादिभ्यः क्विप्) ३.३.१०८

संपद् । विपद् । आपद् । प्रतिपद् । परिषद् ॥

४४ भीमादिः आकृतिगणः
सूत्रम् भीमादयोऽपादाने ३.४.७४

भीम । भीष्म । भयानक । वहचर । वहचरु । प्रस्कन्दन । प्रतपन । प्रपतन । समुद्र । स्रुव । स्रुक् । वृष्टी । वृष्टी । रक्षः । संकसुक । शङ्कुसुक । मूर्ख । खलति ॥

४५ अजादिः
सूत्रम् अजाद्यतष्टाप् ४.१.४

अजा । एडका । कोकिला । चटका । अश्वा । मूषिका । बाला । होडा । पाका । वत्सा । मन्दा । विलाता । पूर्वापिहाणा । पूर्वापहाणा । अपरापहाणा । संभस्त्राजिनशणपिण्डेभ्यः फलात् । सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् । शूद्रा चामहत्पूर्वा जातिः । क्रुञ्चा । उष्णिहा । देवविशा । ज्येष्ठा । कनिष्ठा । मध्यमा । पुंयोगेऽपि । मूलान्नञः । दंष्ट्रा ॥

४६ स्वस्रादिः
सूत्रम् न षट्स्वस्रादिभ्यः ४.१.१०

स्वसृ । दुहितृ । ननान्दृ । यातृ । मातृ । तिसृ । चतसृ ॥

४७ समानादिः
सूत्रम् नित्यं सपत्न्यादिषु ४.१.३५

समान । एक । वीर । पिण्ड । श्व । शिरी । भ्रातृ । भद्र । पुत्र । दासाच्छन्दसि ॥

४८ गौरादिः
सूत्रम् षिद्गौरादिभ्यश्च ४.१.४१

गौर । मत्स्य । मनुष्य । शृङ्ग । पिङ्गल । हय । गवय । मुकय । ऋष्य । पुट । दूण । द्रुण । द्रोण । हरिण । कोकण । काकण । पटर । उणक । आमल । आमलक । कुबल । बिम्ब । बदर । फर्करक । कर्करक । तर्कार । शर्कार । पुष्कर । शिखण्ड । सल । शष्कण्ड । सनन्द । सुषम । सुषव । अलिन्द । गडु । षाण्डश । आढक । आनन्द । आश्वत्थ । सृपाट । आखक । आपच्चिक । शष्कुल । सूर्य । सूर्म । शूर्प । सूप । वृस । अतस । भ । भृङ्ग । मह । मठ । छेद । पेश । मेद । श्वन् । तक्षन् । अनडुही ।

अनड्वाही । एषणः करणे । देह । देहल । काकादन । गवादन । तेजन । रजन । लवण । औद्गाहमानि । आद्गाहमानि । गौतम । गोतम । पारक । आयस्थूण । अयःस्थूण । भौरिक । भौलिकि । भौलिङ्गि । यान । मेघ । आलम्बि । आलजि । आलब्धि । आलक्षि । केवाल । आपक । आरट । नट । टोट । नोट । मूलाट । शातन । पोतन । पातन । पाठन । पानठ । आस्तरण । अधिकरण । अधिकार । आग्रहायणी । आग्रहायणी । प्रत्यवरोहिणी । सेचन । सुमङ्गलात्संज्ञायाम् । अण्डर । सुन्दर । मण्डल । मन्थर । मङ्गल । पट । पिण्ट । षण्ड । उर्द । गर्द । शम । सूद् । औड । आर्द्र । हृद । ह्रद । पाण्ड । भाण्डल । भाण्ड । लोहाण्ड । कदर । कन्दर । कदल । तरुण । तलुन । कल्माष । बृहत् । महत् । सोम । सौधर्म । रोहिणी नक्षत्रे । रेवती नक्षत्रे । विकल । निष्फल । पुष्कल । कटाच्छ्रोणिवचने । पिप्पल्यादयश्च । पिप्पली । हरितकी । हरीतकी । कोशातकी । शमी । वरी । शरी । पृथिवी । क्रोष्टु । मातामह । पितामह ॥

४९ बह्वादिः आकृतिगणः
सूत्रम् बह्वादिभ्यश्च ४.१.४५

बहु । पद्धति । अञ्चति । अङ्कति । अंहत । शकटि । शकति । शक्तिः । शस्त्रे । शारि । वारि । राति । राधि । शाधि । अहि । कपि । यष्टि । मुनि । इतः प्राण्यङ्गात् । कृदिकारादक्तिनः । सर्वतोऽक्तिन्नर्थादित्येके । चण्ड । अराल । कृपाण । कमल । विकट । विशाल । विशङ्कट । भरुज । ध्वज । चन्द्रभागानद्याम् । चन्द्रभागा नद्याम् । कल्याण । उदार । पुराण । अहन् । कोड । नख । शिखा । बाल । शफ । गुद । भग । गल । राग ॥

५० क्रोडादिः आकृतिगणः
सूत्रम् न क्रोडादिबह्वचः ४.१.५६

क्रोडा । खुरा । ऊखा । बाला । शफा । गुदा । घोणा । नखा । मुखा । सुभगा । सुगला ॥

५१ शार्ङ्गरवादिः
सूत्रम् शार्ङ्गरवाद्यञो ङीन् ४.१.७३

शार्ङ्गरव । कापटव । गौग्गुलव । ब्राह्मण । बैद । गौत । कामण्डलेय । ब्राहमकृतेय । निचे । आनिधे । आशोकेय । वात्स्यायन । मौञ्जायन । कैकस । काप्य । काव्य । शैव्य । एहि । पर्येहि । आश्मरथ्य । औदपान । अराल । चण्डाल । वतण्ड । भोगवद्गौरिमतोः संज्ञायां घादिषु (६.३.४३) नित्यं ह्रस्वार्थम् । मृमरयोर्वृद्धिश्च ॥

५२ क्रौड्यादिः
सूत्रम् क्रौड्यादिभ्यश्च ४.१.८०

कौडि । लाडि । व्याडि । आपिशलि । आपक्षिति । चौपयत । चैटयत । वैटयत । सैकयत । बैल्वयत । सौधातकि । सूतयुवत्याम् । भोज । क्षत्रिये । यौतकि । कौटि । भौरिकि । भौलिकि । ल्मल । शालास्थलि । कापिष्ठलि । गौकक्ष्य ॥

५३ अश्वपत्यादिः
सूत्रम् अश्वपत्यादिभ्यश्च ४.१.८४

अश्वपति । ज्ञानपति । शतपति । धनपति । गणपति । स्थानपति । यज्ञपत । राष्ट्रपति । कुलपति । गृहपति । शुपत । धान्यपति । धन्वपति । न्धुपति । धर्मपत । सभापति । प्राणपति । क्षेत्रपति ॥

५४ उत्सादिः
सूत्रम् उत्सादिभ्योऽञ् ४.१.८६

उत्स । उदपान । विकर । विनद । महानद । महानस । महाप्राण । तरुण । तलुन । बष्कयासे । पृथिवी । धेनु । पङ्क्ति । जगती । त्रिष्टुप् । अनुष्टुप् । जनपद । भरत । उशीनर । ग्रीष्म । पीलुकुण । उदस्थान देशे । पृषदंश । भल्लकीय । रथंतर । मध्यंदिन । बृहत् । महत् । सत्त्वत् । कुरु । पञ्चाल । इन्द्रावसान । उष्णिह् । ककुभ् । सुवर्ण । देव । ग्रीष्मादच्छन्दसि ॥

५५ बाह्वादिः आकृतिगणः
सूत्रम् बाह्वादिभ्यश्च ४.१.९६

बाहु । उपबाहु । उपवाकु । निवाकु । शिवाकु । वटाकु । उपनिन्दु । पबिन्द । वृषली । वृकला । चूडा । बलाका । मूषिका । कुशला । भगला । छगला । घ्रुवका । धुवका ।

सुमित्रा । दुर्मित्रा । पुष्करसद् । अनुहरत् । देवशर्मन् । अग्निशर्मन् । द्रशर्मन । सुशर्मन् । कुनामन् । सुनामन् । पञ्चन् । सप्तन् । अष्टन् । अमितौजसः सलोपश्च । सुधावत् । उदञ्चु । शिरस् । माष । शराविन् । मरीचि । क्षेमवृद्धिन् । शृङ्खलतोदिन् । खरनादिन् । नगरमर्दिन् । प्राकारमर्दिन् । लोमन् । अजीगर्त । कृष्ण । युधिष्ठिर । अर्जुन । साम्ब । गद । प्रद्युम्न । राम । उदङ्क । उदकः संज्ञायाम् । संभूयोम्भसोः सलोपश्च । सात्त्वकिः । जाङ्घिः । ऐन्दशर्मिः । आजधेनविः ॥

५६ कुञ्जादिः

सूत्रम् गोत्रे कुञ्जादिभ्यश्च्फञ् ४.१.९८

कुञ्ज । ब्रध्न । शङ्ख । भस्मन् । गण । लोमन । शठ । शाक । शुण्डा । शुभ । विपाश । स्कन्द । स्कम्भ ॥

५७ नडादिः

सूत्रम् नडादिभ्यः फक् ४.१.९९

नड । चर । वर । बक । मुञ्ज । इतिक । इतिश । उपक । एक । लमक । शलङ्कु शलङ्कं च । सप्तल । वाजप्य । तिक । अग्निशर्मन्वृशगणे । प्राण । नर । सायक । दास । मित्र । द्वीप । पिङ्गर । पिङ्गल । किङ्कर । किङ्कल । कातर । कातल । काश्यप । कुश्यप । काश्य । काल्य । काव्य । अज । अमुष्य । अमुष्म । कृष्णरणौ ब्राह्मणवासिष्ठे । अमित्र । लिगु । चित्र । कुमार । क्रोष्टु क्रोष्टं च । लोह । दुर्ग । स्तम्भ । शिंशपा । अग्र । तृण । शकट । सुमनस् । सुमत । मिमत । ऋच् । जलंधर । अध्वर । युगंधर । हंसक । दण्डिन् । हस्तिन् । िण् । पञ्चाल । चमसिन् । सुकृत्य । स्थिरक । ब्राह्मण । चटक । बदर । अश्वल । खरप । लङ्क । इन्ध । अस्त्र । कामुक । व्रह्मदत्त । उदुम्बर । शोण । अलोह । दण्डप ॥

५८ बिदादिः

सूत्रम् अनृष्यानन्तर्ये बिदादिभ्योऽञ् ४.१.१०४

बिद । उर्व । कश्यप । कुशिक । भरद्वाज । उपमन्यु । किलात । कन्दर्प । किदर्भ । विश्वानर । ऋषिषेण । ऋष्टिषेण । ऋतभाग । हर्यश्व । प्रियक । आपस्तम्ब ।

कूचवार । शरद्वत् । शुनक । शुनक् । धेनु । गोपवन । शिग्रु । बिन्दु । ोग । भाजन । शमिक । अश्वावतान । श्यामाक । श्यामक । श्यावलि । श्यापर्ण । हरित । किदास । वह्यस्क । अर्कलूष । वध्योग । विष्णुवृद्ध । प्रतिबोध । रचित । रथन्तर । गविष्ठिर । निषाद । शब्र । अलस । मठर । मृडाकु । सृपाकु । मृद । पुनर्भू । पुत्र । दुहितृ । ननान्द । परस्त्री परशुं च ॥

५९ गर्गादिः

सूत्रम् गर्गादिभ्यो यञ् ४.१.१०५

गर्ग । वत्स । वाजासे । संकृति । अज । व्याघ्रपात् । विदभृत् । प्राचीनयोग । अगस्ति । पुलस्ति । रेभ । अग्निवेश । शङ्ख । शट । शक । एक । घूम । अवट । मनस् । धनंजय । विश्वावसु । जरमाण । लोहित । शंसित । बभ्रु । वल्गु । मण्डु । शङ्कु । लिगु । गुहलु । मन्तु । मङ्क्षु । अलिगु । जिगीषु । मनु । तन्तु । मनायीसूनु । कथक । कन्थक । ऋक्ष । तृक्ष । वृक्ष । तनु । तरुक्ष । तलुक्ष । तण्ड । वतण्ड । कपिकत । कपि । कत । कुरुकत । अनडुह् । कण्व । शकल । गोकक्ष । अगस्त्य । कण्डिनी । यज्ञवल्क । पर्णवल्क । अभयजात । विरोहित । वृषगण । रहूगण । शण्डिल । वर्णक । चणक । चुलुक । मुद्गल । मुसल । जमदग्नि । पराशर । जतूकर्ण । जातूकर्ण । महित । मन्त्रित । अश्मरथ । शर्कराक्ष । पूतिमाष । स्थूरा । अदरक । अररक । एलाक । पिङ्गल । कृष्ण । गोलन्द । उलूक । तितिक्ष । भिषज । भिषज् । भिष्णज । भडित । भण्डित । दल्भ । चेकित । चिकित्सित । देवहू । इन्द्रहू । एकलु । पिप्पलु । बृहदग्नि । सुलोहिन । सुलाभिन् । उक्थ । कुटीगु ॥

६० अश्वादिः

सूत्रम् अश्वादिभ्यः फञ् ४.१.११०

अश्व । अश्मन् । शङ्ख । शूदक । विद । पुट । रोहिण । खर्जूर । खजूर । ञ्जार । वस् । पिजूर । भडिल । भण्डिल । भडित । भण्डित । प्रकृत । रामोद । क्षान्त । काश । तीक्ष्ण । गोलाङ्क । अर्क । स्वर । स्फुट । चक्र । श्रविष् । पविन्द । पवित्र । गोमिन् ।

श्याम । धूम । धूम्र । वाग्मिन् । विश्वानर । कुट । शप । अत्रेये । जन । जड । खड । ग्रीष्म । अर्ह । कित । विंशप । विशाल । गिरि । चपल । चुप । दासक । वैल्य । बैल्व । प्राच्य । धर्म्य । आनडुह्य । पुंसि जाते । अर्जुन । प्रहृत । सुमनस् । दुर्मनस् । मन । मनन । प्रान्त । ध्वन । आत्रेय । भरद्वाजे । भरद्वाज । आत्रेये । इत्स । आतव । कितव । वद । धन्य । पाद। शिव । खदिर ॥

६१ शिवादिः आकृतिगणः
सूत्रम् शिवादिभ्योऽण् ४.१.११२

शिव । प्रोष्ठ । प्रोष्ठिक । चण्ड । जम्भ । भूरि । दण्ड । कुठार । ककुभ् । ककुभा । अनभिम्लान । कोहित । सुख । संधि । मुनि । ककुत्स्थ । कहोड । कोहड । कहूय । कहय । रोद । कपिञ्जल । कुपिञ्जल । खञ्जन । वतण्ड । तृणकर्ण । क्षीरह्रद । जलह्रद । परिल । पथिक । पिष्ट । हैहय । ार्षिक । गोपिका । कपिलिका । जटिलिका । अलेखन । विश्रवण । रवण । वर्तनाक्ष । ग्रीवाक्ष । पिटक । विटप । पिटाक । तृक्षाक । नभक । ऊर्णनाभ । चरत्कारु । पृथा । उत्क्षेप । पुरोहितिका । सुरोहितिका । सुरोहिका । आर्यश्वेत । अर्यश्वेत । सुपिष्ट । मसुरकर्ण । मयूरकर्ण । ज़ूरकर् । कदूरक । तक्षन् । ऋष्टिषेण । गङ्गा । विपाश । मस्क । लह्य । द्रुह्य । अयस्थूण । तृणकर्ण । तृण । कर्ण । पर्ण । भलन्दन । विरूपाक्ष । भूमि । इला । सपत्नी । द्व्यचो नद्याः । त्रिवेणी त्रिवणं च ॥

६२ शुभ्रादिः आकृतिगणः
सूत्रम् शुभ्रादिभ्यश्च ४.१.१२३

शुभ्र । विष्ट । पुर । विष्टपुर । ब्रह्मकृत । शतद्वार । शलाथल । शलाकाभ्रू । लेखाभ्रू । लेखाम्र । विकसा । विकास । रोहिणी । रुक्मिणी । धर्मिणी । दिश् । शालूक । अजबस्ति । शकंधि । विमातृ । विधवा । शुक । विश । देवतर । शकुनि । शुक । अम्र । ज्ञातल । शतल । बन्धकी । सृकण्डु । विस्रि । अतिथि । गोदन्त । कुशाम्ब । मकुण्ड । शाताहर । पवष्टुरिक । सुनामन् । लक्ष्मणश्यामयोर्वासिष्ठे । गोधा । कृकलास ।

अणीव । प्रवाहण । भरत । भारत । भरम । मुकण्ड । कर्पूर । इतर । अन्यतर । आलिढ । सुदन्त । सुचक्ष । सुचक्षस् । सुदामन । कद्रु । तुद । अकशाय । कुमारीका । कुठारिका । किशोरिका । अम्बिका । जिह्माशिन् । परिधि । वायुदत्त । शकल । शलाका । खडूर । कुबेरिका । अशोका । गन्धपिङ्गला । खडोन्मत्ता । अनुदृष्टिन् । अनुदृष्टि । जरतिन् । बलीवर्दिन् । विप्र । वीज । जीव । श्वन । अश्मन् । अश्व । अजिर ॥

६३ कल्याण्यादिः
सूत्रम् कल्याण्यादीनामिनङ् ४.१.१२६

कल्याणी । सुभगा । दुर्भगा । बन्धकी । अनुदृष्टि । अनुसृष्टि । जरती । बलीवर्दी । ज्येष्ठा । कनिष्ठा । मध्यमा । परस्त्री ॥

६४ गृष्ट्यादिः
सूत्रम् गृष्ट्यादिभ्यश्च ४.१.१३६

गृष्टि । हृष्टि । बलि । हलि । विश्रि । कुद्रि । अजबस्ति । मित्रयु ॥

६५ रेवत्यादिः
सूत्रम् रेवत्यादिभ्यष्ठक् ४.१.१४६

रेवती । अश्वपाली । मणिपाली । द्वारपाली । वृकवञ्चिन् । वृकबन्धु । वृकग्राह । कर्णग्राह । दण्डग्राह । कुक्कुटाक्ष । ककुदाक्ष । चामरग्राह ॥

६६ कुर्वादिः
सूत्रम् कुर्वादिभ्यो ण्यः ४.१.१५१

कुरु । गर्गर । मङ्गुष । अजमार । रथकार । वावदूक । सम्राजः । क्षत्रिये । कवि । मति । विमति । कापिञ्जलादि । वाक् । वामरथ । पितृमत् । इन्द्रजाला । एजि । वातकि । दामोष्णीषि । गणकारि । कैशोरि । कुट । शालाका । शलाका । मुर । पुर । एरका । शुभ्र । अभ्र । दर्भ । केशिनी । विनाच्छन्दसि । शूर्पणाय । श्यावनाय । श्यावरथ । श्यावपुत्र । सत्यङ्कार । वडभीकार । पथिकार । मू । शकन्धु । शङ्कु ।

शाक । शालिन् । कर्तृ । हर्तृ । इन । पिण्डी । तक्षन् । वामरथस्य कण्वादिवत्स्वरवर्जम् ॥

६७ तिकादिः
सूत्रम् तिकादिभ्यः फिञ् ४.१.१५४

तिक । कितव । संज्ञा । बाला । शिखा । उरस् । शाठ्य । सैन्धव । यमुन्द । रूप्य । ग्राम्य । नील । अमित्र । गोकक्ष्य । गौकक्ष्य । कुरु । देवरथ । तैतिल । औरस । कौरव्य । भैरिकि । भौलिकि । चौपयत । चैतयत । चैटयत । शैकयत । क्षैतयत । वाजवत । चन्द्रमस् । शुभ । गङ्गा । वरेण्य । सुपामन् । आरब्ध । वाह्यक । स्वल्पक । वृष । लोमक । उद्रन्य । यज्ञ ॥

६८ वाकिनादिः
सूत्रम् वाकिनादीनां कुक् च ४.१.१५८

वाकिन । गाधेर । कार्कश । काक । लंका । चर्मिवर्मिणोर्नलोपश्च ॥

६९ कम्बोजादिः
सूत्रम् कम्बोजाल्लुक् ४.१.१७५

कम्बोज । चोल । केरल । शक । यवन ॥

७० भर्गादिः
सूत्रम् न प्राच्यभर्गादियौधेयादिभ्यः ४.१.१७८

भर्ग । करूष । केकय । कश्मीर । साल्व । सुस्थाल । उरस् । कौरव्य ॥

७१ यौधेयादिः
सूत्रम् न प्राच्यभर्गादियौधेयादिभ्यः ४.१.१७८

यौधेय । शौक्रेय । शौभ्रेय । ज्यावाणेय । धौर्तेय । धार्तेय । त्रिगर्त । भरत । उशीनर ॥

७२ भिक्षादिः
सूत्रम् भिक्षादिभ्योऽण् ४.२.३८

भिक्षागर्भिणी । क्षेत्र । करीष । अङ्कार । अङ्गार । चर्मिन् । धर्मिन् । सहस्र । युवति । पदाति । पद्धति । अथर्वन् । दक्षिणा । भूत । विषय । श्रोत्र ॥

७३ खण्डिकादिः

सूत्रम् खण्डिकादिभ्यश्च ४.२.४५

खण्डिका । वडवा । क्षुद्रकडालवात् सेनासंज्ञायाम् । क्षुद्रकमालवात् सेनासंज्ञायाम् । भिक्षुक । शुक । उलूक । श्वन् । अहन् । युगवरत्रा । युगवरत्र । हलबन्धा । हलबन्ध ॥

७४ पाशादिः
सूत्रम् पाशादिभ्यो यः ४.२.४९

पाश । तृण । धूम । वात । अङ्गार । पाटल । पोत । गल । पिटक । पिटाक । शकट । हल । नट । वन ॥

७५ खलादिः आकृतिगणः
सूत्रम् इनित्रकट्यचश्च (खलादिभ्य इनिर्वक्तव्यः) ४.२.५१

खल । डाक । कुटुम्ब । शाक । कुण्डलिनी ॥

७६ राजन्यादिः आकृतिगणः
सूत्रम् राजन्यादिभ्यो वुञ् ४.२.५३

राजन्य । आनृत । बाभ्रव्य । शालङ्कायन । दैवयातव । दैवयात । व्रीड । वरत्र । जालंधरायण । राजायन । तेलु । आत्मकामेय । अम्बरीषपुत्र । वसाति । बैल्ववन । शैलूष । उदुम्बर । तीव्र । बैल्वल । आर्जुनायन । संप्रिय । दक्षि । ऊर्णनाभ ॥

७७ भौरिक्यादिः
सूत्रम् भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ४.२.५४

भौरिकि । भौलिकि । चैपयत । चैटयत । काणेय । वाणिजक । वाणिकाज्य । वालिकाज्य । सैकयत । वैकयत ॥

७८ ऐषुकार्यादिः
सूत्रम् भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ४.२.५४

ऐषुकारि । सारस्यायन । सारसायन । चान्द्रायण । द्व्याक्षायण । त्र्याक्षायण । औडायन । जौलायन । खाडायन । दासमित्रि । दासमित्रायण । शौद्रायण । दाक्षायण । शयण्डायन । शायण्डायन । ताक्ष्र्यायण । शौभ्रायण । सौवीर । सौवीरायण । शपण्ड ।

शयण्ड । शौण्ड । शयाण्डि । शयाण्ड । वैश्वमानव । वैश्वध्येनव । वैश्वधेनव । नड । तुण्डदेव । विश्वदेव । सापिण्डि ॥

७९ उक्थादिः

सूत्रम् क्रतूक्थादिसूत्रान्ताट्ठक् ४.२.६०

उक्थ । लोकायत । न्यास । न्याय । पुनरुक्त । निरुक्त । निमित्त । द्विपदा । ज्योतिष । अनुपद । अनुकल्प । यज्ञ । धर्म । चर्चा । अमेतर । श्लक्ष । श्लक्ष्ण । संहिता । पदक्रम । सघट । संघट्ट । वृत्ति । परिषद् । संग्रह । गण । गुण । आयुर्देव । आयुर्वेद ॥

८० क्रमादिः

सूत्रम् क्रमादिभ्यो वुन् ४.२.६१

क्रम । पद । शिक्षा । मीमांसा । सामन् ॥

८१ वसन्तादिः

सूत्रम् वसन्तादिभ्यष्ठक् ४.२.६३

वसन्त । पीष्म । वर्षा । शरद् । शरत् । हेमन्त । शिशिर । प्रथम । गुण । चरम । अनुगुण । अथर्वन् । आथर्वण् ॥

८२ संकलादिः

सूत्रम् संकलादिभ्यश्च ४.२.७५

संकल । पुष्कल । उत्तम । उडुप । उद्वेप । उत्पुट । कुम्भ । विधान । सुदक्ष । सुदत्त । सुभूत । सुनेत्र । सुमङ्गल । सुपिङ्गल । सूत । सिकत । पूतीका । पूतिक । पूलास । कूलास । पलाश । निवेश । गवेश । गम्भीर । इतर । आन् । अहन् । लोमन् । वेमन् । चरण । वरुण । बहुल । सद्योज । अभिषिक्त । गोभृत् । राजभृत् । भल्ल । मल्ल । माल ॥

८३ सुवास्त्वादिः

सूत्रम् सुवास्त्वादिभ्योऽण् ४.२.७७

सुवास्तु । सुवस्तु । वर्णु । भण्डु । खण्डु । सेवानिन् । कर्पूरिन् । शिखण्डिन् । गर्त । कर्कश । शकटीकर्ण । कृष्णकर्ण । कर्क । कर्कन्धुमती । गोह । अहिसक्थ ॥

८४ अरीहणादिः

सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

अरीहण । अहीरण । द्रुघण । द्रुहण । भलग । भगल । उलन्द । किरण । साम्परायण । क्रौष्ट्रायन । क्रौष्ट्रायण । औष्ट्रायण । त्रैगर्तायन । मैत्रायण । भास्त्रायण । वैमतायण । वैमतायन । गौमतायन । सौमतायन । सौसायन । धौमतायन । सौमायन । ऐन्द्रायण । कौद्रायण । कौन्द्रायण । खाडायन । शाण्डिल्यायन । रायस्पोष । विपथ । विपाश । उद्दण्ड । उदञ्चन । खाण्डवीरण । वीरण । काशकृत्स्न । कशकृत्स्न । जाम्बवत् । शिंशपा । रैवत । रेवत । बिल्व । सुयुज्ञ । शिरीष । बधिर । जम्बु । सुशर्मन् । सशर्मन् । हलतृ । भलन्दन । खण्डु । कलन । कनल । यज्ञदत्त ॥

८५ कृशाश्वादिः

सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

कृशाश्व । अरिष्ट । आरीश्म । वेश्मन् । विशाल । लोमश । रोमश । लोमक । रोमक । शबल । कूट । वर्चल । सुवर्चल । सुकर । सूकर । प्रातर । प्रतर । सदृश । पुरग । पुराग । सुख । धूम । अजिन । विनता । अवनत । विकुघास । कुविट्यास । पराशर । अरुस् । अयस् । मौद्गल्याकर । मौद्गल्य । युकर ॥

८६ ऋश्यादिः

सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

ऋश्य । ऋष्य । न्यग्रोध । शर । निलीन । निवास । निवात । निधान । निबद्धन । निबन्ध । विबद्ध । परिगूढ । उपगूढ । असनी । सित । मत् । वेश्मन् । उत्तराश्मन् । अश्मन् । स्थूल । बाहु । खदिर । शर्करा । अनडुह । अनडुह् । अरडु । परिवंश । वेणु । वीरण । खण्ड । दण्ड । परिवृत्त । कर्दम । अंशु ॥

८७ कुमुदादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

कुमुद । शर्करा । न्यग्रोध । इत्कट । संकट । कंकट । गर्त । बीज । परिवाप । निर्यास । शकट । कच । मधु । शिरीष । अश्व । अश्वत्थ । बल्वज । यवास । कूप । विकङ्कत । दशग्राम ॥

८८ काशादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

काश । पाश । अश्वत्थ । पलाश । पीयूक्ष । वरण । वास । नड । वन । कर्दम । कच्छूल । वङ्कट । गृह । बिस । तृण । कर्पूर । बर्बर । मधुर । ग्रह । कपित्थ । जतु । सीपाल ॥

८९ तृणादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

तृण । नड । मूल । वन । पर्ण । वर्ण । वराण । बिल । पुल । फल । अर्जुन । अर्ण । सुवर्ण । बल । चरण । बुस ॥

९० प्रेक्षादिः

सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

प्रेक्षा । फलका । हलका । बन्धुका । ध्रुवका । क्षिपका । न्यग्रोध । इक्कट । कङ्कक । संकट । कट । कूप । बुक । पुक । पुट । मह । परिवाप । यवाष । ध्रुवका । गर्त । कूपक । हिरण्य ॥

९१ अश्मादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

अश्मन् । यूथ । ऊष । मीन । मद । दर्भ । वृन्द । गुद । खण्ड । नग । शिखा । कोट । पाम । कन्द । कान्द । कुल । गह्व । गुड । कुण्डल । पीन । गुह ॥

९२ सख्यादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

सखि । अग्निदत्त । वायुदत्त । सखिदत्त । गोपिल । भल्लपाल । भल्ल । पाल । चक्त । चक्रवाक । छगल । अशोक । करवीर । वासव । वीर । पूर । वज्र । कुशीरक । शीहर । सीहर । सरक । सरस । संमर । समल । सुरस । रोह । तमाल । कदल । सप्तल ॥

९३ संकाशादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

संकाश । कपिल । कश्मीर । समीर । सुरसेन । सरक । सूर । सुपथिन्पन्थ च । यूप । यूथ । अंश । अङ्क । नासा । पलित । अनु । नाश । अश्मन् । कूट । मलिन । दश ।

कुम्भ । शीर्ष । चिरन्त । विरत । समल । सीर । पञ्जर । मन्थ । नल । रोमन् । लोमन् । पुलिन । सुपरि । कटिप । सकर्णक । वृष्टि । तीर्थ । अगस्ति । विकर । नासिका ॥

९४ बलादिः

सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

बल । चुल । नल । दल । वट । लकुल । उरल । पुख । पुल । मूल । उलडुल । उल । डुल । वन । कुल ॥

९५ पक्षादिः

सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

पक्ष । तुक्ष । तुष । कुण्ड । अण्ड । कम्बलिका । वलिक । चित्र । अस्ति । सुपथिन्पन्थ च । कुम्भ । सीरक । सरक । सकल । सरस । समल । अतिश्वन् । रोमन् । लोमन् । हस्तिन् । मक । लोमक । शीर्ष । निवात । पाक । सहक । सिंहक । अङ्कुश । सुवर्णक । हंसक । हिंसक । कुत्स । बिल । खिल । यमल । हस्त । कला । सकर्णक ॥

९६ कर्णादिः

सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

कर्ण । वसिष्ठ । अर्क । अर्कलूष । द्रुपद । अनडुह्य । पाञ्चजन्य । स्फिग । स्फिज् । कुम्भी । कुन्ती । जित्वन् । जीवन्त । कुलिश । अण्डीवत् । आणडीवत । जव । जैत्र । आकन । अनक ॥

९७ सुतङ्गमादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण
प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

सुंतगम । मुनिचित । विप्रचित्त । महाचित्त । महापुत्र । स्वन । श्वेत । गडिक । खडिक । शुक्र । विग्र । बीजावापिन् । बीजवापिन् । अर्जुन । श्वन् । अजिर । जीव । खण्डिन । कर्ण । विग्रह ॥

९८ प्रगद्यादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण
प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

प्रगदिन् । मगदिन् । मंददिन् । कविल । खण्डित । गदित । चूडार । मन्दार । कोविदार ॥

९९ वराहादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण
प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

वराह । पलाशा । पलाश । शेरिष । शिरीष । पिनद्ध । निबद्ध । बलाह । स्थूल । विदग्ध । विजग्ध । विभग्न । निमग्न । बाहु । खदिर । शर्करा ॥

१०० कुमुदादिः
सूत्रम्

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृण
प्रेक्षाऽश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः ४.२.८०

कुमुद । गोमथ । रथकार । दशग्राम । अश्वत्थ । शाल्मली । शिरीष । मुनिस्थल । कुण्डल । कूट । मुधुकर्ण । घासकुन्द । शुचिकर्ण ॥

१०१ वरणादिः
सूत्रम् वरणादिभ्यश्च ४.२.८२

वरणा । शृङ्गी । शाल्मलि । शुण्डि । शयाण्डी । पर्णी । ताम्रपर्णी । गोद । आलिङ्ग्यायन । जालपदी । जानपदी । जम्बू । पुष्कर । सम्पा । पम्पा । वल्गु । उज्जयिनी । गया । मथुरा । तक्षशिला । उरसा । गोमती । वलभी ॥

१०२ मध्वादिः
सूत्रम् मध्वादिभ्यश्च ४.२.८६

